# .. kakArAdi shrI kUrmAShTottarashatanAmastotram ..

# ॥ કકારાદિ શ્રીકૂર્માષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

## Document Information

```
Text title : kakArAdi kUrmAShTottarashatanAmastotram
File name : kakArAdikUrma108nAmastotram.itx
Category : aShTottarashatanAma
Location : doc_vishhnu
Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA
Latest update : January 24, 2016
Send corrections to : sanskrit@cheerful.com
Site access : http://sanskritdocuments.org
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ કકારાદિ શ્રીકૂર્માષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

@@
શ્રી હયગ્રીવાય નમઃ ।
હરિઃ ૐ

કમઠઃ કબ્ધિમધ્યસ્થઃ કરુણાવરુણાલયઃ ।
કુલાચલસમુદ્ધર્તા કુણ્ડલીન્દ્રસમાશ્રયઃ ॥ ૧॥

કઠોરપૃષ્ટઃ કુધરઃ કલુષીકૃતસાગરઃ ।
કલ્યાણમૂર્તિઃ ક્રતુભુક્પ્રાર્થનાધૃત વિગ્રહઃ ॥ ૨॥

કુલાચલસમુદ્ભ્રાન્તિધૃષ્ટકણ્ડૂતિસૌખ્યવાન્ ।
કરાલશ્વાસસઙ્ક્ષુબ્ધસિન્ધૂર્મિપ્રહતામ્બરઃ ॥ ૩॥

કબ્ધિકર્દમકસ્તૂરીલિપ્તવક્ષઃસ્થલઃ કૃતી ।
કુલીરાદિપયસ્સત્ત્વનિષ્પેષણચતુષ્પદઃ ॥ ૪॥

કરાગ્રાદત્તસમ્ભુક્તતિમિઙ્ગિલગિલોત્કરઃ ।
કબ્ધિપુષ્પદ્વિરેફાભઃ કપર્દ્યાદિસમીડિતઃ ॥ ૫॥

કલ્યાણાચલતુઙ્ગાત્માગાધીકૃતપયોનિધિઃ ।
કુલિશત્પૃષ્ઠસઙ્ઘર્ષક્ષીણમૂલકુલાચલઃ ॥ ૬॥

કાશ્યપીસત્કુચપ્રાયમન્દરાહતપૃષ્ઠકઃ ।
કાયૈકદેશાપર્યાપ્તશેષદિગ્ગજમણ્ડલઃ ॥ ૭॥

કઠોરચરણાઘાતદ્વૈધીકૃતપયોનિધિઃ ।
કાલકૂટકૃતત્રાસઃ કાણ્ડદુર્મિતવૈભવઃ ॥ ૮॥

કમનીયઃ કવિસ્તુત્યઃ કનિધિઃ કમલાપતિઃ ।
કમલાસનકલ્યાણસન્ધાતા કલિનાશનઃ ॥ ૯॥

કટાક્ષક્ષતદેવાર્તિઃ કેન્દ્રાદિવિધૃતાંજલિઃ ।
કાલીપતિપ્રીતિપાત્રં કામિતાર્થપ્રદઃ કવિઃ ॥ ૧૦॥

કૂટસ્થઃ કૂટકમઠઃ કૂટયોગિસુદુર્લભઃ ।
કામહીનઃ કામહેતુઃ કામભૃત્કંજલોચનઃ ॥ ૧૧॥

ક્રતુભુગ્દૈન્યવિધ્વંસી ક્રતુભુક્પાલકઃ ક્રતુઃ ।
ક્રતુપૂજ્યઃ ક્રતુનિધિઃ ક્રતુત્રાતા ક્રતૂદ્ભવઃ ॥ ૧૨॥

કૈવલ્યસૌખ્યદકથઃ કૈશોરોત્ક્ષિપ્તમન્દરઃ ।
કૈવલ્યનિર્વાણમયઃ કૈટભપ્રતિસૂદનઃ ॥ ૧૩॥

ક્રાન્તસર્વામ્બુધિઃ ક્રાન્તપાતાલઃ કોમલોદરઃ ।
કન્ધિસોર્મિજલક્ષૌમઃ કુલાચલકચોત્કરઃ ॥ ૧૪॥

કટુનિશ્વાસનિર્ધૂતરક્ષસ્તૂલઃ કૃતાદ્ભુતઃ ।
કૌમોદકીહતામિત્રઃ કૌતુકાકવિતાહવઃ ॥ ૧૫॥

કરાલિકંટકોદ્ધર્તા કવિતાબ્ધિમણીસુમઃ ।
કૈવલ્યવલ્લરીકન્દઃ કન્દુકીકૃતચન્દિરઃ ॥ ૧૬॥

કરપીતસમસ્તાબ્ધિઃ કાયાન્તર્ગતવાશ્વરઃ ।
કર્પરાબ્જદ્વિરેફાભમન્દરઃ કન્દલત્સ્મિતઃ ॥ ૧૭॥

કાશ્યપીવ્રતતીકન્દઃ કશ્યપાદિસમાનતઃ ।
કલ્યાણજાલનિલયઃ ક્રતુભુઙ્નેત્રનન્દનઃ ॥ ૧૮॥

કબન્ધચરહર્યક્ષઃ ક્રાન્તદર્શિમનોહરઃ ।
કર્મઠાવિષયઃ કર્મકર્તૃભાવાદિવર્જિતઃ ॥ ૧૯॥

કર્માનધીનઃ કર્મજ્ઞઃ કર્મપઃ કર્મચોદનઃ ।
કર્મસાક્ષી કર્મહેતુઃ કર્મજ્ઞાનવિભાગકૃત્ ॥ ૨૦॥

કર્તા કારયિતા કાર્યં કારણં કરણં કૃતિઃ ।
કૃત્સ્નં કૃત્સ્નાતિગઃ કૃત્સ્નચેતનઃ કૃત્સ્નમોહનઃ ॥ ૨૧॥

કરણાગોચરઃ કાલઃ કાર્યકારણતાતિગઃ ।
કાલાવશઃ કાલપાશબદ્ધભક્તાવનાભિધઃ ॥ ૨૨॥

કૃતકૃત્યઃ કેલિફલઃ કીર્તનીયઃ કૃતોત્સવઃ ।
કૃતેતરમહાનન્દઃ કૃતજ્ઞઃ કૃતસત્સુખઃ ॥ ૨૩॥

॥ ઇતિ કકારાદિ શ્રી કમઠાવતારાષ્ટોત્તરશતમ્ રામેણ પરાભવ
વૈશાખ બહુલદ્વાદશ્યાં લિખિતમ્ શ્રી હયગ્રીવાયાર્પિતમ્ ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

.. kakArAdi shrI kUrmAShTottarashatanAmastotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*